"ईशा-केन-कठ-प्रश्न-मुण्ड-माण्डक्य-तित्तिरि" ॥)

कठमर्द्दः, पुं, (कठं कष्टजीवनं मृद्नातीति। कठ मृद+अण्।) शिवः। इति त्रिकाण्डशेषः॥

कठरः,त्रि,(कठ+अरन्।) कठिनः। इति जटाधरः॥

कठशाखा,स्त्री, (यजुर्वेदान्तर्गता कठेन प्रोक्ता शाखा।) यजुर्वेदस्य शाखाविशेषः। एतद्विवरणं वेदशब्दे द्रष्टव्यम्॥

कठाहकः,पुं,(कठं कठिनमाहन्तीति। आ+हन्+डः। कठाहः तादृशं कं शिरो यस्य।) दात्यूह-पक्षी। इति शब्दरत्नावली॥

कठिञ्जरः, पुं, (कठिं कठिनं जरयति। जृष् वयो-हानौ तस्मात् अच्। पृषोदरादित्वात् साधुः। यद्वा जृ+णिच्+बाहुलकात्+खच् मुम् च।) तुलसीवृक्षः। तत्पर्य्यायः। पर्णासः २ कुठेरकः ३। इत्यमरः। २।४।७९॥ ("लोणिका-जातुकपर्णिका-पत्तूर-जीवक-सुवर्चला-कुरवक-कठिञ्जर-कुन्तलिका-कुरण्टिकाप्रभृतीनि"॥ इति सुश्रुते द्रष्टव्यम्॥)

कठिनं, त्रि, (कठ्+इनन्। उणादिमते तु इनच्। "बहुलमन्यत्रापि"। उणां। २।४।९।) कठरम्। तत्पर्य्यायः। कक्खटम् २ क्रूरम् ३ कठोरम् ४ निष्ठुरम् ५ दृढम् ६ जठरम् ७ मूर्त्तिमत् ८ मूर्त्तम् ९। इत्यमरः। ३।१।७६॥ खक्खटम् १० कठोलम् ११ जरठम् १२। इति तट्टीका। कर्कशम् १३ कठरम् १४। इति जटाधरः॥ काठरम् १५ कमठायितम् १६। इति शब्दरत्नावली॥ स्तब्धम्। इति मेदिनी॥ ("उन्मूलयंश्च कठिनान् नृपान् वायुरिव द्रुमान्"। कथासरित्सागरे १९।९९॥ तथा कुमारे ४।५। "न विदीर्य्ये कठिनाः खलु स्त्रियः"॥ अपि च "भक्ष्यांश्चातिकठिनान् दन्तरोगी विवर्जयेत्"। सुश्रुते।)

कठिनं, क्ली, स्त्री, (कठ्+"बहुलमन्यत्रापि"। उणां २।४९। इति इनच्।) स्थाली। इति मेदिनीशब्दरत्नावल्यौ॥

कठिनपृष्ठकः, पुं, (कठिनं पृष्ठकमस्य। पृष्ठ स्वार्थे संज्ञायां वा कन्।) कच्छपः। इति राजनिर्घण्टः॥

कठिना, स्त्री, (कठ+इनच्। स्त्रियां टाप्।) गुड़-शर्करा। इति विश्वमेदिन्यौ॥

कठिनिका, स्त्री, (कठ+इनच्+गौरादित्वात् ङीष् स्वार्थे कन्। टापि ह्रस्वश्च।) कठिनी। इति हारावली। खड़ी इति भाषा॥

कठिनी, स्त्री, (कठिन+गौरादित्वात् ङीष्।) खड़िका। इति मेदिनी। खड़ी इति भाषा॥ तत्पर्य्यायः। पाकशुक्ला २ अमिलाधातुः ३ कक्खटी ४ खटी ५ खड़ी ६ वर्णलेखिका ७। इति रत्नमाला। धातूपलः ८ कठिनिका ९। इति हारावली। (तथा च हितोपदेशे १।१८। "गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य। तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी नाम"॥)

कठिल्लः, पुं, (कठति भोजने दुःखं उद्वेगं वा जनयति। अतीवतिक्तत्वात् तथात्वं। कठ शोके इति धातोर्बाहुलकादिल्लप्रत्ययः।) कारवेल्लः। इत्युणादिकोषः। करला इति भाषा॥ (वाभटे शाकवर्गाणां मध्ये गणितम्॥ यथा,—

"कठिल्लं केम्बुकं शीतं स कोषातक कर्कशम्।
तिक्तं पाके कटुग्राहि वातलं कफपित्तजित्"॥)

कठिल्लकः, पुं, (कठिल्ल+स्वार्थे कन्।) कारवेल्लः। पुनर्णवा। तुलसी। इति त्रिकाण्डशेषः॥

कठी, स्त्री, (कठेन प्रोक्तमधीते या शाखाध्येतृवाचित्वेन जातित्वात् ङीष्। कठप्रोक्तमधीयाना इत्यर्थः।) ब्राह्मणी। इति जटाधरः॥

कठेरः, पुं, (कठति कृच्छ्रेण जीवति जीविकां निर्व्वाहयति। "पतिकठिकुठिगड़िगुड़िदंशिभ्यएरक्"। उणां।१।५९ इति एरक्।) कृच्छ्रजीवी। दरिद्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कठोरः, त्रि, (कठति पारुष्यमाचरति। "कठिचकिभ्यामोरन्" उणां १।६५। इति कठ+ओरन्।) कठिनः। इत्यमरः। ३।१।७६॥ (यथा, भागवते ३।१९।२५।

"प्रद्वद्धरोषः स कठोरमुष्टिना
नदन् प्रहृत्यान्तरधीयतासुरः"॥

दारुणः। तथाहि भागवते। ५।१३।३। "कठोरदंशैर्मशकैरुपद्रुतः"॥ अतिविस्तृतः। तत्रैव ६।१२।२। "युगान्ताग्निकठोरजिह्वं"॥ पूर्णः। तथाहि।

"स तप्तकार्त्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः"।

इति माघः।१।२०॥ "कठोरताराधिपस्य पूर्णेन्दोः" इति तट्टीकायां मल्लिनाथः॥)

कठोलः, त्रि, (कठ+ओलच् "कपिगतिगण्डिकटिपटिभ्य ओलच्" उणां।१।६७।) कठोरः। इत्यमरटीकायां नीलकण्ठः॥

कड इ ङ ञ दर्पे। हर्षे इत्यर्थः। इति कविकल्पद्रुमटीकायां दुर्गादासः। (भ्वां-आत्मं-अकं-सेट्-पक्षे उभं-इदित्।) इ कर्म्मणि कण्ड्यते। ञ कण्डति कण्डते। ङ कण्डते जनो हृष्टः स्यादित्यर्थः। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो ञकारः। अनेकार्थत्वात् तुषापनयने च। (भ्वां-आत्मं-सकं।) "कण्डते तण्डुलं लोकः"। इति दुर्गादासः॥

कड श मदे। दर्पे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-दर्पे अकं-सेट्।) श कड़ती कड़न्ती। प्राच्यास्तु वेदे तुदादिगणभेदार्थं भ्वादावप्येवं पठन्ति। तथा च। "कड मद इति धातुः पठ्यते भुतुदाद्योः कड़ति कड़ति रूपं तुल्यमेव द्वयोः स्यात्। तदुभयगणपाठे किं फलं नेति वाच्यं स्वरकृत इह भेदः शपशयोरस्ति यस्मात्" इति। स्वरकृत इति उदात्तानुदात्तस्वरितविरिब्धसंज्ञकचतुर्व्विधस्वरकृत इत्यर्थः। इति दुर्गादासः॥

कड इ क भेदे। रक्षणे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्-इदित्।) इ कण्डयति। इति दुर्गादासः॥

कड़ः, त्रि, (कड़ति माद्यतीति। कड़ मदे+पचाद्यच्।) मूर्खः। इति हलायुधः॥

कड़क्कं, क्ली, (कड्यते अद्यते इति। कड अदने+अच् संज्ञायां कन्। कर्म्मणि अप् स्वार्थे संज्ञायां वा कन्।) लवणविशेषः। करकच इति भाषा॥ तत्पर्य्यायः। सामुद्रम् २ त्रिकूटम् ३। इति रत्नमाला॥ अस्य गुणाः सामुद्रशब्दे द्रष्टव्याः॥

कड़ङ्गः, पुं, (कड़ं मादकताशक्तिं गमयति जनयति वा कड़ात् गमेर्डः। अन्तर्भूतो ण्यन्तो वा।) सुराविशेषः। इत्युणादिकोषः॥

कड़ङ्गरः, पुं, (कड़ात् भक्षणीयतण्डुलादेः सकाशात् गिर्य्यते क्षिप्यते दूरीक्रियते इति भावः। कड़+गिरतेः कर्म्मणि खच्। यद्वा कड़ं भक्षणीयं शस्यादि गिरति उद्गिरति आत्मनः सकाशात्। गॄ+अच्।) बुषं इत्यमरः। २।९।२२। आगड़ा इति भाषा॥

("नीवारपाकादि कड़ङ्गरीयै-
रामृश्यते जानपदैर्न कच्चित्"।

इति रघुः।५।९॥ कड़ङ्गरं बुषम् अर्हन्तीति कड़ङ्गरीया इति तट्टीकायां मल्लिनाथः॥)

कड़त्रं, क्ली, (गड्यते सिच्यतेऽत्र जलादिकम्। गड़+अत्रन् गड़ेरादेश्च कः।) पात्रविशेषः। इति उणादिकोषः॥ (गड्यते सिच्यतेऽनेन।गड़+सेचने "गड़ेरादेश्च कः" उणाम्।३।१०६। इति अत्रन् प्रत्ययः ड़लयोरेकत्वस्मरणात् कलत्रम्॥

कड़म्बः, पुं, (कड़+"कृकदिकड़िकटिभ्योऽम्बच्" उणाम्।४।८२। इति कड़धातोरम्बच्प्रत्ययः।) शाकनाड़िका। डाँटा इति भाषा॥ तत्पर्य्यायः। कलम्बः २। इत्यमरः। २।९।३५॥ कोणम्। प्रान्तभागः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (कलम्बशब्दे विशेषो ज्ञेयः॥)

कड़म्बी, स्त्री, (कड़म्बः कलम्बो भूयसा विद्यते अस्याः। इति अर्शआदित्वात् अच् ततः गौरादित्वात् ङीष्।) कलम्बीशाकम्। इति शब्दरत्नावली॥ (कलम्बीशब्दे गुणादयोऽस्या वक्तव्याः॥)

कड़ारः, पुं, (गड़। सेचने इति+"गड़ेः कड़ च"। उणाम्।३।१३५। इति आरन् कड़ादेशश्च धातोः।) पिङ्गलवर्णः। तद्वर्णयुक्ते त्रि। इत्यमरः। १।५।१६॥ (यथा माघः।५।३।

"सविधुरम्बरविकाधि चमूसमुत्थं
पृथ्वीरजः करभकण्ठकड़ारमाशाः"॥)

कड़ारस्तृणवह्निवत् इत्यन्ये इति भरतः॥ दासः। इति मेदिनी॥

कड़ितुलः, पुं, (कट्यां तुला तोलनं ग्रहणं यस्य पृषोदरादित्वात् टस्य डः।) खड्गः। इति शब्दरत्नावली॥

कडु कार्कश्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) टवर्गतृतीयोपधः। क्विपि संयोगान्तलोपे कड्। कड्डति पद्मश्यालं कर्कशं स्यादित्यर्थः। इति दुर्गादासः॥

कण भ्र आर्त्तस्वरे। इति कविकल्पद्रुमः॥ (भ्वां-